Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# आचार्याच्युतानन्ददाशविरचितायाः शुकसंविदकथायाः समीक्षा

अरूण शर्मा
शोधच्छात्रः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपाल परिसरः, भोपालम्,भारतम्।

**Article Info**
Volume 3 Issue 6
Page Number : 205-211

**Publication Issue :**
November-December-2020

**Article History**
Accepted : 01 Dec 2020
Published : 25 Dec 2020

**सारांशः–** सन्ति नैके विद्वन्मूर्धन्याः कविवरेण्याः साहित्यकुलभूषणाः कविचक्रचूडामणयः विद्वच्छिरोमणयः नानाशास्त्रेषु कृतभूरिपरिश्रमाः, ज्ञानविदग्धाः प्रज्ञावन्तः इह भूतले। किन्तु एतेषु आचार्याच्युतानन्दमहोदयः दाशोपाख्यः पुण्यश्लोकः प्रातस्मरणीयो विज्ञः कथाकारो गौरवास्पदं पदमलङ्करोति। नानाशास्त्रप्रवीणोऽयं महामनीषी अनेकान् मनोभावान् सङ्ग्राह्य सामाजिकीः समस्या क्रोडीकृत्य कथानां संरचनामकरोत्। अच्युतानन्ददाशमहोदयः उत्कलप्रदेशे बालेश्वरमण्डले अध्ययनमारब्धवान्। मौलिकप्रतिभावान् सः चिन्तनसर्जनप्रकाशनेषु दत्तरुचिः परिस्फुरन्तं प्रतिभाविशेषं प्रोदसाहयत्। पुणे विश्वविद्यालयेऽपि आचार्यप्रवरः अधीतवान् तत्र महोदयस्य लेखनप्रतिभा आधिक्येन प्रसृता जागरिता च। कालान्तरे सितम्बरमासस्य 11 दिनाङ्के या घटना सञ्जाता तया घटनया प्रभावितः सन आचार्योऽयमस्य कथासङ्ग्रहस्य प्रथमां कथां शुकसंविद् इति लिखितवान्। एषा कथा तदानीन्तन पत्रिकायां कथासरित् इति नामधेयायां प्रकाशिता। विविधसामाजिकसमस्याः स्वीयं विकटरूपं प्रकाशयन्ति महोदयस्य कथायाम्। आचार्यस्य कथासु पारम्परिकगद्यशैली परिलक्ष्यते। यथा- 'मा गामनागम्' इति कथायां पोलिथिनसमस्यामुद्घाटयति गोमाध्यमेन। यद्यपि गौः मानव इव न ब्रूते तथापि संवेदना तु तस्यामपि भवति। सा अपि जीव एव। इतोऽपि अस्माकं समाजे गवां स्थानं विद्यते। परन्तु वर्तमानकाले गोपालनविमुखसामाजिकाः दृश्यते। येन कारणेन गवां दुर्दशा भवति। अस्याः कथायां मार्मिकचित्रणं कृतं दाशमहोदयेन। अस्याः कथायाः शीर्षकमपि विलक्षणं विद्यते ' मा गामनागम्' इति। संवेदनासिक्तेन आचार्यप्रवरेण अच्युतानन्ददाशेन पूर्णमनोयोगेन कथाः विरचिताः।

**मुख्यशब्दः–** अच्युतानन्ददाशः, कृतभूरिपरिश्रमाः, ज्ञानविदग्धाः, प्रज्ञावन्तः, शुकसंविदकथा।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**अच्युतानन्दकथासाहित्यग्रन्थस्य परिचय:-** अस्मिन् ग्रन्थे अच्युतानन्ददाशकृतकथानां सङ्ग्रहो विद्यते। अस्य ग्रन्थस्य सम्पादक: डॉ. नारायणदाशोऽस्ति। ग्रन्थस्यास्य प्रकाशनं संस्कृतभारतीसंस्थया 2011 ईस्वीयवर्षे अभवत्। इदं प्रथमं प्रकाशनमासीत् अस्य कथासङ्ग्रहस्य। ग्रन्थस्यास्यारम्भे 'शुकसंवित्' नामधेया कथा विद्यते। शुकसंवित, मा गामनागाम्, कपालपाणि, शीर्णं पाटलदलम् सप्तर्षिमण्डलस्य उत्पत्ति:, कियन्तं भूभागं जनो नु वाञ्छति? इति षट्कथा: सन्ति ग्रन्थेऽस्मिन्। अत्र काचित् कथा, काचिच्च अनूदितकथा विद्यते। इदानीमत्र कथानां परिशीलनमुपस्थाप्यते-

- **शुकसंवित्-** अस्यां कथायां कानिचन पात्राणि इमानि सन्ति। तद्यथा' श्रीविद्या, देवश्री: शुभंयु: सोऽहम्, आश्रमस्य सन्यासी, शुकश्चेति। मध्ये मध्ये प्रसङ्गवशात् अन्येषामपि नामग्रहणं क्रियते। परन्तु ते प्रत्यक्षरीत्या भूमिकायां न सन्ति।
- शुकसंवित् इति कथाया: भाषा-

भाषा इति कथनेन कथाया: विभिन्ना: पक्षा: समागच्छन्ति पुरत:। यथा शैली अपि भाषायामेव अन्तर्भूता भवति। किञ्च संस्कृतभाषा तु लेखकस्य माध्यमभाषा अस्तयेव। अत: भाषा इति कथनेन संस्कृतमांग्लमुरिया वेति प्रश्न एव न भवितुमर्हति। कथायां भाषाया: प्रवाहो दृश्यते। पारम्परिकभाषां परित्यज्य वर्तमानकालिकीं भाषां स्वीकरोति कथाकार:। भाषायां सहजता अपि दृश्यते। कदाचित् यत्र प्रसिद्धशब्दे कार्यं प्रचलति तत्र संस्कृतस्य शरणं न वाञ्छति कथाकार:। व्याकरणदृष्ट्या च अयं कथाकार: महान् समुन्नत आसीदिति स्पष्टतया ज्ञायते। कथाया: आरम्भ: जिज्ञासया भवति। तद्यथा- "कदा नु खलु तत्र प्राप्स्याम श्रीविद्या सस्नेहमप्रच्छत् देवश्रियम्। किमति उत्कृष्ठसे? मा भैषि। ननु सायन्तनात्पूर्वमेव आश्रमपदमधिगन्तुं शक्नुमो वयम्' प्रत्यवादीत्[1] देवश्री:।" (पृ.1)

अत्र 'आतिथेयम्' इति पदस्य प्रयोग: मन्ये 'रेस्टोरेन्ट' इत्यस्मिन् अर्थे कृत: कथाकारेण। किञ्च शीतलपेयस्य प्रयोगस्य 'कोल्डड्रिंक्स' इत्यस्य स्थानेऽभूत्। कारयानस्य स्पष्टतया नामोल्लेखो दृश्यते। भावस्य सहजता अपि दृश्यते कथायाम्। यथा " नहि नहि अङ्कल्। हन्त - स्वकीयशिरसि स्वीयहस्तेन संताड्य अहो किं किं नु वक्तव्यं संस्कृतेन अङ्कल इत्यस्य कृते, देवश्रि!

तातपाद इति वा पितृव्यपाद इति वा वक्तुमर्हति भवती, अवोचद् देवश्री:।[2] " (पृ.1)

एतेन आङ्ग्लस्य प्रभाव: समाजे पूर्णतया अस्तीति ज्ञायते। किन्तु कथाकारस्य संस्कृतप्रेमबहिरागच्छति। अत एव शुभंयु: पुन:' किं नु वक्तव्यं संस्कृतेन अङ्कल इत्यस्य कृते इति पृच्छति। अन्तत: भावस्यैव प्राबल्यं परिलक्ष्यतेऽत्र। यतो हि "मा मैवं पुत्रि। त्वं माम् 'अङ्कल इत्येव आकारय। त्वन्मुखात् अस्मिन्नेव नाम्नि मे श्रोत्रसंस्कार: चिराद्वरीवर्ति अस्तु किं वक्तुकामा आसीद् भवती?[3] " (पृ.1)

प्रसङ्गेऽस्मिन् इयं बाला यथा पूर्वं वदति स्म किं वा सम्बोधयति स्म तथैव आचरितवती। मध्ये अङ्कलजी कौतुकं कृतवान्। परन्तु अन्तत: अङ्गीकृतवान् यत् भवति' अङ्कल' इत्येव वदतु।

एतेषां महानुभावानां यात्रा आश्रमं प्रति विद्यते।
सर्वे जना: आश्रमं गन्तुं समुत्सका: सन्ति। विशेषतया 'श्री विद्या' उत्कण्ठितास्ति। यथा बाला: आचरन्ति तथैव अत्र श्रीविद्याया: आचरणं विद्यते। सा वदति "अहं तु केवलम् उत्कष्ठिता आसं तत्र भवतां स्वामिचरणानां दर्शनार्थम्। नाहं क्लान्तास्मि, नापि किञ्चित पेयं वा भोज्यं वा कामये। अहं त्वेवमिच्छामि यत् यथाशीघ्रम् आश्रममण्डलमेव गत्वा तत्रैव विरमाम: मार्गे पुन: काल: विलम्बतो मा भवतु[4] इति।"(पृ.1) अत्र 'तत्रभवतां स्वामि-श्रीचरणानाम्' इति वाक्यांशे, तत्र भवतामिती पदमतिसम्माननीयानां कृते प्रयुज्यते। श्रीविद्याया: बभुक्षा पिपासापि इदानीं गता। कथाकार: भारतीयपरिवेशे यथा नारीणां भोज्यादिविषये रुचि: भवति तथैव विवृणोति। यद्यपि एते जना: अमेरिकादेशे सन्ति। मन्ये प्रियव्रत: श्रीविद्याया: पति: विद्यते। यतो हि अत्र शुभंयुमहोदयस्य वार्तालापक्रमे सा वदति- "स: मम भोज्यादिविषये किञ्चित् संवदेनाधिक्यं प्रदर्शयति। अहं तु चट्पटादिभोज्यपदार्थजातेन, भेलपुरी चाट, इत्यादिकेन अधिकं प्रीणामीतिकृत्वा प्रियव्रतस्तु मां नित्यं परिहसति- त्वया भारतदेश एव स्थातव्यमासीत्। अथवा अत्रैव अमेरिकादेशे भेलपुरी, चाट समोसा जलेबी अपूप इत्यादीनामापणमेकं स्थापयितुमर्हति भवतीति। अङ्कल ननु धूर्त:[5] स:। "पृ ; 2
यतो हि कथालेखकः महानुभाव: उत्कलीय: तस्य पूर्णतया प्रभावो विद्यते कथायामस्याम्। अत: 'आमिक्षापूपम्' (छेनापोडा इति उत्कलीयभाषायाम्) मिष्टान्नविशेषस्य प्रयोग: कृत:। किञ्च 'आण्टी' इतिशब्दस्य यथावत् व्यवहारो दृश्यतेऽत्र। अस्यां कथायां श्रीविद्या परचित्तविमर्शपरायणा अतीव सहृदया, संवेदनाया: सर्वेषां च कल्याणगुणानां मूर्तिमती सुखान्येव वितरन्ती देवीव दिव: अवतीर्णा काचित् असामान्या योषिद्रूपेण साक्षाच्छ्रीविद्या अन्वर्थनामाविद्यते। Indian Fast-Food & Complete food. इत्यस्य कृते तूर्णभोज्यम् - पूर्णभोज्यम् इति शब्दानां प्रयोगोदृश्यते।

श्रीजगन्ननाथपुर्यां यथा पण्डाजनानां व्यवहारो भवति तेन दु:खित: आसन् कथाकार: इति ज्ञायते। न्यूयौर्कमध्ये शुभंयुमहोदयस्य मित्रं शुभकान्त आचार्य: कश्चित् सज्जनो विराजमान:। स यद्यपि ब्राह्मण: तथापि वणिक्कर्म करोति। उत्कलप्रदेशे एकमास्पदं भवति 'आचार्य' इति। शुभंयुमुखेन लेखक: इत्थं ज्ञापयति- "औत्कलोऽयंजन: अतीव साधु: सुचरित:, न च कदापि अविमृश्यकारीति श्रूयते। जात्या ब्राह्मणोऽपि वृत्त्या वणिक्कर्म आचरन् स्वकुटुम्बभरणं करोत्यसौ। अस्य पितृचरणास्तु पुरी - श्रीक्षेत्रे भगवन्तं श्रीजगन्नाथम् अहर्निशं सेवमाना दिवं गता:। न ते इतरेषां पण्डाजनानामिव यातृलुण्ठका आसन् इति प्राय: तेषां गृहे दैनन्दिनभैक्ष्यमपि कष्टेन आगच्छति स्म।" इति

अत्र 'पण्डाजनानामिव यातृलुण्ठका न आसन्' इति वाक्येन कथाकारस्य व्यथा प्रस्फुटति। यतो हि पुर्यां केचन तादृशा: सन्ति यै: अन्ये सज्जना: अपि निन्दनं प्राप्नुवन्ति। अत एव कथाकार: पण्डाजनानां विषये प्रावोचत्। कथायां भारतीयताया: वैदेशिकतायाश्च मिश्रितप्रभाव: परिलक्ष्य अत्र लिखति कथाकार: -"तात! इत्येव उक्त्वा लज्जावनतानना अधोमुखी बभूव देवश्री:।

- उँ हुँ , भ्रातृजाये। अमेरिकादेशे नैतादृशो लज्जावनतभाव: शोभते। भवत्या तु प्रगल्भया भाव्यम्।6 इति पृ• 5

आश्रमं प्रति लेखकस्य श्रद्धा विद्यते। अयं जन: भगवत्या: पराम्बाया: कृपया सर्वं प्राप्तवान्। तद्यथात्र विवृणोति -" गोधूलिवेला अपगतप्राया आसीत्। यावत्तैराश्रममण्डलं प्राप्तम्। सायंकालीनपूजार्चनासु स्वामिश्रीचरणा: व्यापृता आसन्। सायन्तन- आरार्तिक्यं प्रचलद् आसीत्। शङ्खघण्टाध्वनिभि: आश्रममण्डलममर्त्यमण्डलमिव शोभते स्म। धूपागुरुघृतदीपादिसुगन्धेन कि ञ्चिद् दिव्यं तद् वातावरणं मनस्सु अलौकिकं भावं जनयति स्म। सर्वे त्वरया यानादवतीर्य हस्तपादादिप्रक्षालनं कृत्वा देव्या: समक्षमुपातिष्ठन्। आरार्तिक्यदीपज्योतिषा देव्या: पीताम्बराया: मुखमण्डलम् अपूर्वकान्तिसमायुक्तमासीत्। चक्षुषो: काचिद् दिव्यज्योति: निस्सरन्तीवाभाति स्म। प्रथमोपगतस्य मनस्सु जीवन्मुर्तिरिव शान्तोदात्तनेत्रप्रभया भगवती पराम्बा आत्मानम् आमृशन्तीव अपूर्वं भावं जनयति स्म।" इति पृ ।

सायङ्कालीनारार्तिक्यस्य विलक्षणं वर्णनं सम्पादयत् दाशमहोदय:। स्वर्गेण सह आश्रमस्य तुलनां विदधाति कथाकार:। मातु: पराम्बाया: पीताम्बराया: मुखमण्डलस्य हृदयाकर्षक वर्णनं विधत्तेऽत्र महानुभाव:। अस्मिन् वातावरणे श्रीविद्यापराम्बायां तल्लीना सञ्जाता। भगवत्या: पीताम्बराया: समक्षं करबद्धभावेन दण्डायमाना

सा संसारं विस्मृतवती। रात्रौ सर्वे विश्रामं कृतवन्तः। या श्रीविद्या नववादनपर्यन्तं प्रातः शयाना भवति स्म सा अद्य ब्राह्ममुहूर्ते जागरणादिकं विद्याय अन्यान् स्वकीयजनान् उदस्थापयत्। श्रीविद्ययाः हृदये मातुः पराम्बरायाः स्नेहः प्राविशत्।

"अद्यापि श्रीविद्या भगवत्याः पराम्बायाः समक्षं करबद्धभावेन तादात्म्यमनुभवन्तीव ध्यानस्था आसीत्। देवश्रियाः करस्पर्शेन श्रीविद्या प्रकृतिस्था सञ्जाता। स्वामि-श्रीचरणानां चरणस्पर्शः कार्य इति सङ्केतेन ज्ञात्वा तेषां पादयोः सभक्तिकं प्रणम्य श्रीविद्या यावत् किं कर्तव्यविमूढभावेन देवश्रियाः मुखं प्रेक्षते तावत् स्वामि-श्रीचरणानां स्निग्धमधुरवचोभिः सम्बोधिता सा-मातः! सर्वे ध्यानमण्डपम् अधिष्ठातुमर्हति भवती। भगवती पराम्बा त्वदागमनं प्रतीक्षते स्म। यन्त्रचालितेव श्रीविद्या ध्यानमण्डपं प्राप्ता आसीत्।" [7] पृ. 6।

प्रपञ्चेऽस्मिन् को वा तादृशः यो मातुः कृपां प्राप्य अन्यमन्यां वा वाञ्छेत्। सर्वे जनाः ध्यानमण्डपमागतवन्तः। स्वामिश्रीचरणा अपि विराजमाना सन्ति मण्डपे। इमे महानुभावाः अष्टाशीतिवर्षदेशीया आसन्। श्वेतश्मश्रुसहितदिव्यप्रभासमन्विता आसन् ते। दिव्यतायाः प्रतिमूर्तयः प्रतीयन्ते महानुभावाः। अत्र आगमनवेलायां श्रीविद्यायाः मनसि न कापि कामना आसीत् न च कापि भ्रमति स्म हृदये। केवलमेकः प्रश्नः स्वाभाविकरूपेण मनसि उद्वेगं जनयति स्म। स्वामिनः दिव्यात्मानः उत केवलं तृणाच्छन्नकूपा इव वञ्चकाः सन्ति। केचन तादृशाः सन्ति समाजे अतः प्रश्नः स्वाभाविकतां धत्ते। यतो धर्मसम्मूढता न सम्यक् कार्यं भवति धार्मिकता स्यात् किन्तु धर्मान्धता न समीचीना। सीतायाः हरणमपि साधुवेशेनैव कृतवान् रावणः। प्रायः जनाः सज्जनवेशेनैवच्छलिताः भवन्ति। अतः कथाकारः सामाजिकान् प्रेरयति अनेन प्रश्नेन। परन्तु न सर्वे तादृशाः अतः श्रद्धामपि प्रकटयति। "स्वामिश्रीचरणानां दर्शनादेव सेयं शङ्का दूरतः पराहता अरुणागमे अन्धःतमिस्रेव। स्वामिश्रीचरणानां दिव्यात्मतां प्रति नासावपेक्षते प्रमाणान्तरम् न हि प्रदीपस्य प्रकाशात्मतां प्रकाशयितुं प्रदीपान्तरस्यापेक्षा भवति कदाचित्। तेषां दर्शनमात्रेण यदद्भुतलोकसामान्यं प्रशान्तभावमनुभूतं तया तदेव दिव्यात्मसान्निध्यं व्यनक्ति। तस्याःमनसि चिरम् अध्यात्मविदां प्रति आसीत्। यः दृढमवज्ञाभावः दिनकरकिरणजालसङ्लग्नसमकालमेव द्रवीभवत् हिमनिचय इवाभूत् सः। स्वस्य भावपरिवृत्तिरेव कापि चमत्कृतिरिति सा चिन्तयति स्म। कदाचित सद्वृत्तानां मनसः विपरितवृत्तिरेव अध्यात्ममार्गे उन्नायिका भवतीति दृश्यते।[8] ''पृष्ठ 8''

श्रीविद्याया: दुर्भावनानां समाधानं सञ्जातमत्र।

यदा सर्वे जना: स्वामिपादानां परिपार्श्वे आसन्। तदा कश्चित् शुक: श्रीविद्याया: अङ्कमागत्य उपाविशत्। सर्वे जना: एवम्प्रकारेण दृश्यं दृष्टवा चकिता: सञ्जाता:। स्वामिपादा: शुकस्य विषये सर्वं तथ्यं ज्ञापयति। नायं सामान्य: शुक: अपितु कश्चित् महात्मा शुकशरीरे वर्तते। स्वामिमहाभाग: पुन: वदति-"सर्वो हि कालाधीन:। कालो हि प्रभविष्णु: प्राणिनां कर्मपरिपाकानुगुणं फलं दातुम्।[9] " इति पृ. 9

मन्ये महाभागा: किमपि भविष्यं दृष्टवा वाक्यमिदमवदत्। यतो हि नायं सामान्यवाक्यमपितु गम्भीरार्थसंयुतं विद्यते। अत एव भगवता श्रीकृष्णेनोक्तम् -[10] "कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्त:। ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिता: प्रत्यनीकेषु योधा:।। गीता।।/32" सर्वं कालवशगं भवति। काले सर्वं परिसमाप्यते। किञ्च कालस्यैव प्रभावेण सर्वाणि कार्याणि प्रभावितानि भवन्ति। अत एवोच्यते- "कालस्य कुटिला गति:[11]

काल: कर्म अकर्म विकर्म च सर्वं पश्यति। अत: तस्मै कालाय नम:। इत्थञ्च महात्मान: तान् सर्वान् विज्ञाप्य विषयं निवृत्ता: भवन्ति। कथाकारस्य हृदये भारतस्य स्थिति: धनविषये सम्यक् नास्ति। यतो हि पाश्चात्यदेशानामपेक्षया भारतदेशे धनाभावो दृश्यते। अत: श्रीविद्याया: मुखात् सर्वाणि तथ्यानि उद्घाटयति-

"कृतार्थास्मि अनेन पुण्यकरेण भगवद्दर्शनेन। धन्यास्मि चानेन नूतनसहचरलाभेन। धन्यं ह्येतद्भारतवर्षं यत्र भवादृशा: पुण्यपुरुषा अद्यापि विराजन्ते। इदं हि विडम्बनं यत् समृद्धि: श्री: न्यायपरिपालिता सती पाश्चात्यदेशम् अध्यास्ते। कुतो वा न्यायनयपराङ्मुखता भारतीयानां कुतो वा लक्ष्मीरितो दूरं गता इति को वेद?" इति।

यदा एते पुन: प्रत्यावर्तनं कृतवन्त: अमेरिकादेशं प्रति तदा शुक: रटति स्म "रक्षो वैमानिक:, रक्षो वैमानिक:, रक्षो वैमानिक: इति। श्रीविद्या स्वसखीं निवेदयति न्यूयॉर्कनगरस्य सर्वोत्तुङ्गप्रसादयुग्मकयोरगन्यतमप्रसादस्य सप्तसप्ततितमतले भवने दण्डायमानास्मि। विश्ववाणिज्यकेन्द्रम् इति नाम्ना इदं भवनं विश्वप्रथितं वर्तते। प्रियव्रतस्य वाणिज्यमधिकृत्य किमप्यत्र चर्चासत्रं प्रचलदस्ति। अस्मिन् चर्चासत्रे तस्य प्रस्तुति: महत्त्वपूर्णास्ति। प्रायश: उत्तुङ्गप्रासादजालविस्तीर्णं समग्रं न्यूयॉर्कनगरम् इत: अतिरमणीयतममाभाति। एकत: प्रशान्तमहासागरस्य नीलिमा आकाशस्य नीलिमानं स्पर्धत इवाभाति। अस्य राष्ट्रस्य समृद्धे: प्रतीकभूतमेतद् हर्म्ययुगम् इति जनाश्चिन्तयन्ति। अत्र वणिक्कर्मार्थमेक: कार्यालय: अनायासेन लब्ध इति प्रियव्रतस्य आत्मगौरवं स्फीततरं भवतीति जाने । स्थाने[12] च एतत्।" पृ.12

अस्या: महोदयाया: पति: प्रियव्रत: न्यूयॉर्कनगरस्य विश्ववाणिज्यकेन्द्रे कार्यार्थमागतोऽस्ति। अत्रैव एते महोदया: समागता:। सप्तसप्ततितले एते सर्वे विराजमाना: सन्ति। वस्तुत: इदं स्थानं 'वर्ल्ड ट्रेड सेन्टर' इति वर्तते। इत: संसारस्य मुख्यवाणिज्यकेन्द्राणां सञ्चालनं क्रियते। सर्वे जना: उत्साहेन आनन्देन न्यूयॉर्कनगरं पश्यन्त: सन्ति। तत: प्रशान्तमहासागरस्य नीलवर्णयुक्तं स्वरूपं दृश्यते। अमेरिकादेशस्य समृद्धे: प्रतीकस्वरूपमिदं केन्द्रं विद्यते। पुन: शुको वदति- 'रक्षो वैमानिक:' रक्षो वैमानिक: इति। तस्मिन्नेव काले तस्मिन् केन्द्रे कोऽपि विमानेन आक्रमणं कृतवान्। तद्दिनमासीत् 11-09-2001 अस्मिन्नेव दिने' वर्ल्डट्रेड सेन्टर' इत्यत्र 'अलकायदासङ्घटनेन' आक्रमणं कृतम्। अनया घटनया दु:खित: सन् कथाकार: कथामरचयत्।

सन्दर्भा: -

1. अच्युतानन्दकथासाहित्यम्
2. श्रीमद्भगवद्गीता
3. सुभाषितरत्नभाण्डागारम् 373/194
4. अच्युतानन्दकथासाहित्यम्

**सन्दर्भग्रन्थसूची-**


5. अच्युतानन्दकथासाहित्यम् आचार्यः अच्युतानन्ददाश: संस्कृतभारती, नवदेहली, प्रथममुद्रणम् – 2011
6. श्रीमद्भगवद्गीता गीताप्रेस, गौरखपुर, संवत् 2058
7. चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी द्वितीय, वि.सं. 2060, सन् 2003